International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 113-116
© 2026 IJMH
www.themultijournal.com
Received: 18-09-2026
Accepted: 10-10-2026
Publish : 12-10-2026

**हरिश्चन्द्रः**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
भोपालपरिसरः

**प्रो. सनन्दनकुमारत्रिपाठी**
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**Correspondence:**
**हरिश्चन्द्रः**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
भोपालपरिसरः

# एकाग्रभारतनाटके राष्ट्रस्वरूपस्य विमर्शः

**हरिश्चन्द्रः, प्रो. सनन्दनकुमारत्रिपाठी**

## सारांशः (Abstract)

भारतीयचिन्तनपरम्परायां राष्ट्रम् इति संकल्पना केवलं भौगोलिकसीमायुक्तं क्षेत्रं न, अपितु तत्र निवसतां जनानां सांस्कृतिक-ऐतिहासिक-राजनीतिक-आध्यात्मिकैक्यस्य समष्टिरूपम् अस्ति। कौटिल्यस्य अर्थशास्त्रे प्रतिपादितः सप्ताङ्गसिद्धान्तः राष्ट्रस्य संरचनायाः मूलाधारः अस्ति स्वामी, अमात्यः, जनपदः, दुर्गम्, कोशः, दण्डः, मित्रञ्च सन्ति। एतेषु जनपदः राष्ट्रस्य प्राणतत्त्वं मन्यते, यतः प्रजाः विना राष्ट्रस्य अस्तित्वं न संभवति। एकाग्रभारतमिति नाटके राष्ट्रस्वरूपं बहु-आयामिकदृष्ट्या निरूपितम् अस्ति। नाटककारः राष्ट्रं केवलं राजकीयसंस्था न मन्यते, अपितु सांस्कृतिकैक्यस्य, कर्तव्यबोधस्य, नैतिकमूल्यानां च समष्टिरूपेण प्रस्तुतवान्। नाटके विविधेषु श्लोकेषु राष्ट्रैकता, राष्ट्रधर्मः, राष्ट्ररक्षा, लोककल्याणभावना, नेतृत्वस्य सेवाभावः च स्पष्टतया प्रतिपादिताः सन्ति। यत्रैकाग्रतया राष्ट्रं क्रियते **विश्वतोमुखम्**[1] इत्यस्मिन् श्लोके राष्ट्रस्य एकाग्रता एव तस्य उन्नतेः मूलकारणम् सूचितम् अस्ति। तथैव **शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते**[2] इति वचनेन राष्ट्रसुरक्षायाः अनिवार्यता प्रतिपादिता। पुनश्च एकं राष्ट्रस्य पर्यायः राष्ट्रमेकीकृतं पदमिति श्लोके राष्ट्रस्य मूलतत्त्वं एकता इति स्पष्टीकृतम्। राष्ट्रस्य स्वातन्त्र्यं, सामाजिकव्यवस्था, सांस्कृतिकपरम्परा च सुरक्षायाः आधारेण एव तिष्ठन्ति। अतः राष्ट्रधर्मः राष्ट्रसंरक्षणेन सह सम्बद्धः इति नाटककारस्य अभिप्रायः। एकाग्रभारतम् नाटकं प्राचीनभारतीय-राजनीतिकचिन्तनस्य आधुनिकराष्ट्रीयभावनया सह समन्वितं सशक्तं साहित्यिकप्रतिबिम्बं भवति। एतत् नाटकं राष्ट्रवादस्य समन्वयात्मकं विश्वबन्धुत्वप्रधानं च स्वरूपं प्रकाशयति । एकाग्रभारतमिति नाटके राष्ट्रस्य भौगोलिकं, सांस्कृतिकं, राजनीतिकं, आध्यात्मिकं नैतिकञ्च एते आयामाः सम्यग् प्रतिबिम्बिताः सन्ति। एतन्नाटकं प्राचीनभारतीयराष्ट्रदर्शनस्य आधुनिकराष्ट्रचेतनया सह समन्वितं सशक्तं साहित्यिकप्रतिनिधित्वमिति निष्कर्षतः वक्तुं शक्यते।

## 1. भूमिका (Introduction)

भारतीयसंस्कृतौ राष्ट्रम् इति पदं केवलं भौगोलिकसीमायुक्तं प्रदेशं न सूचयति, अपितु तत्र निवसतां जनानां सांस्कृतिक-राजनीतिक-ऐतिहासिक-आध्यात्मिकैक्यस्य समष्टिरूपं बोधयति। राष्ट्रमिति शब्दः राजधातोः निष्पन्नः इति केचन व्युत्पत्तिविदः मन्यन्ते, यस्य मूलार्थः रञ्जन-पालन-संरक्षणभावेन युक्तः जनसमूहः इति स्वीक्रियते। अतः राष्ट्रं केवलं भूमेः नाम न, अपितु तत्रत्यानां जनानां जीवनमूल्यानां, परम्पराणां, संस्कृतेः, चैतन्यस्य च संगठितरूपम् अस्ति।

"एकाग्रभारतम्" इति संस्कृतनाटकं प्रख्यातसंस्कृतविदुषा प्रो.रामलखनपाण्डेयमहोदयेन विरचितम्। डॉ. पाण्डेयः झारखण्डराज्ये लब्धजन्मा श्रोत्रियब्राह्मणः संस्कृतसाहित्ये गभीरपाण्डित्यं, नवीनचिन्तनं च योजयित्वा अनेकान् ग्रन्थान् प्रणीतवान्। एतत् पञ्चाङ्कीयं संस्कृतनाटकं वर्तते यत् पौराणिक-कथावस्तुनः आधारेण अपि समसामयिकविषयाणां गम्भीरं विश्लेषणं प्रस्तौति। नाटकं महाभारतस्य गुरुकुल-शिक्षण-एकलव्य-द्रोणाचार्य-प्रसङ्गानाम् आधारेण विकसितम्, किन्तु तत्र नूतनदार्शनिक-व्याख्या योजिता।

एतस्मिन् सन्दर्भे प्रो. रामलखनपाण्डेयविरचितं "एकाग्रभारतम्" इति संस्कृतनाटकं विशिष्टं स्थानं बिभर्ति। इदं नाटकं महाभारतस्य पौराणिककथावस्तुनः आधारेण रचितमपि समसामयिक-राष्ट्रियविमर्शस्य सजीवं माध्यमं भवति। अत्र पारम्परिककथानकं नूतनदृष्टिकोणेण प्रस्तुत्य भारतीयज्ञानपरम्परायाः मूलभूतसिद्धान्ताः सर्जनात्मकरूपेण पुनः प्रतिष्ठापिताः।

अस्मिन् नाटके एकाग्रतायाः संकल्पना केवलं व्यक्तिगतध्यानावस्थायाः एव न, अपितु राष्ट्रियएकीकरणस्य, सामाजिकसमरसतायाः, शैक्षणिकपरिवर्तनस्य च मूलाधारत्वेन प्रस्तुता। गुरुकुलस्य शैक्षणिकव्यवस्था, एकलव्यस्य सामाजिकसमावेशिता, द्रोणद्रुपदयोः राजनैतिकसंवादः, शिवार्जुनयोः आध्यात्मिकसाक्षात्कारः च - एते सर्वेऽपि अङ्गाः भारतीयज्ञानपरम्परायाः विविधपरिमाणानां दर्शनं कुर्वन्ति।

एतत् नाटकं विशेषतया महत्त्वपूर्णं भवति यतोह्यत्र संस्कृतभाषायाः शास्त्रीयसौन्दर्येण सह प्राकृतभाषायाः लौकिकसरलतायाः समन्वयः दृश्यते, यः भारतीयसमाजस्य बहुभाषिकस्वरूपस्य प्रतिबिम्बनं करोति। तथैव पञ्चाङ्कानां संरचना पञ्चकोशसिद्धान्तस्य, नाटकीयप्रतीकानि च भारतीयदर्शनस्य गहनतां प्रकटयन्ति।

भारतीयचिन्तनपरम्परायां राष्ट्रस्य सङ्कल्पना अत्यन्तं प्राचीनतया, व्यापकतया च प्रतिपादिता दृश्यते। वैदिकसाहित्यात् आरभ्य महाकाव्येषु, धर्मशास्त्रेषु, अर्थशास्त्रे, पुराणेषु च राष्ट्रस्य स्वरूपविषये गम्भीरचिन्तनं प्राप्यते। राष्ट्रं केवलं भौगोलिकसीमायुक्तः प्रदेशः न, अपितु तत्र निवसतां जनानां सांस्कृतिक-ऐतिहासिक-राजनीतिक-आध्यात्मिकजीवनस्य समष्टिरूपम् अस्ति। राष्ट्रस्य मूलाधारः जनसमुदायः भवति, यः समानसंस्कृतेः, परम्परायाः, इतिहासस्य, जीवनमूल्यानां च आधारेण परस्परं सम्बद्धः भवति।

भारतीयवाङ्मये राष्ट्रस्य सप्ताङ्गसिद्धान्तः कौटिल्येन अर्थशास्त्रे प्रतिपादितः अस्ति—

**"स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि राष्ट्राङ्गानि[3]"**

अत्र स्वामी (राजा), अमात्यः (मन्त्री), जनपदः (प्रजा), दुर्गम् (सुरक्षा), कोशः (आर्थिकशक्तिः), दण्डः (शासनव्यवस्था), मित्रम् (विदेशनीति) इति सप्ताङ्गानि राष्ट्रस्य आधारभूततत्त्वानि सन्ति। एतेषु जनपदः अत्यन्तमहत्त्वपूर्णः अस्ति, यतः प्रजाभिः विना राष्ट्रस्य अस्तित्वं न सम्भवति। कौटिल्यस्य अर्थशास्त्रे राष्ट्रस्य सप्ताङ्गस्वरूपं प्रतिपादितम् अस्ति स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि[4] राष्ट्राङ्गानि इति। अत्र स्वामी, अमात्यः, जनपदः, दुर्गम्, कोशः, दण्डः, मित्रश्च राष्ट्रस्य प्रमुखाङ्गानि निर्दिष्टानि सन्ति। एतेषु जनपदः अर्थात् प्रजाजनः राष्ट्रस्य अत्यन्तमहत्त्वपूर्णमङ्गं मन्यते। एतस्मात् ज्ञायते यत् राष्ट्रं केवलं राज्यव्यवस्थायाः पर्यायः न, अपितु प्रजायाः, संस्कृतेः, भूमेः, परम्परायाश्च समन्वितस्वरूपम् अस्ति।

आधुनिकपरिप्रेक्ष्ये राष्ट्रस्य परिभाषा अपि एतादृशी एव दृश्यते। निश्चितभूभागे निवसन् जनसमूहः, यः सांस्कृतिक-राजनीतिक-ऐतिहासिकभावनया एकीकृतः भवति, राष्ट्रमिति कथ्यते। क्षेत्रम्, भाषा, धर्मः, संस्कृतिः, इतिहासः, सभ्यता, आध्यात्मिकभावना च राष्ट्रनिर्माणस्य प्रमुखतत्त्वानि सन्ति। एतेषां समन्वयेन राष्ट्रस्य विशिष्टं स्वरूपं निर्मीयते। एकाग्रभारतमिति नाटकं राष्ट्रचिन्तनस्य दृष्ट्या महत्त्वपूर्णं साहित्यिककृतित्वम् अस्ति। अस्मिन् नाटके राष्ट्रशब्दस्य प्रयोगः विविधसन्दर्भेषु कृतः दृश्यते। नाटककारः राष्ट्रस्य एकता, राष्ट्रधर्मः, राष्ट्ररक्षा, सांस्कृतिकसमन्वयः, लोककल्याणभावना, विश्वबन्धुत्वम् इत्यादीनां तत्त्वानां सशक्तं निरूपणं करोति। यत्रैकाग्रतया राष्ट्रं क्रियते विश्वतोमुखम्, **"शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते"**, "एकं राष्ट्रस्य पर्यायो राष्ट्रमेकीकृतं पदम् इत्यादयः श्लोकाः राष्ट्रस्य व्यापकं स्वरूपं प्रकाशयन्ति।

अतः प्रस्तुतशोधपत्रे एकाग्रभारतमिति नाटके प्रतिबिम्बितस्य राष्ट्रस्वरूपस्य अध्ययनं क्रियते। नाटकस्थश्लोकानामाधारेण राष्ट्रस्य भौगोलिकं, राजनीतिक, सांस्कृतिकं, आध्यात्मिकं तथा च नैतिकस्वरूपस्य विश्लेषणं कृत्वा तस्य आधुनिकप्रासङ्गिकतायाः अपि मूल्याङ्कनं विधास्यते।

## 2. संकेतशब्दाः

राष्ट्रम्, एकाग्रभारतम्, राष्ट्रस्वरूपम्, कौटिल्यः, सप्ताङ्गसिद्धान्तः, जनपदः, राष्ट्रधर्मः, सांस्कृतिकैक्यम्, राष्ट्रीयचेतना, विश्वबन्धुत्वम्।

## 3. शोधस्योद्देश्यानि (Research Objectives)

**"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"** अस्या उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति । अतः प्रस्तुतशोधपत्रस्य निम्नलिखितानि उद्देश्यानि सन्ति -

1. राष्ट्रशब्दस्य भारतीयपरम्परायां व्युत्पत्त्यर्थयोः विवेचनम्। शोधस्योद्देश्यानि
2. कौटिलीयसप्ताङ्गसिद्धान्तस्य राष्ट्रदृष्टेः विश्लेषणम्।
3. एकाग्रभारतमिति नाटके राष्ट्रस्वरूपस्य विमर्शः ।
4. राष्ट्रैकता, राष्ट्रधर्मः, राष्ट्ररक्षा इत्यादीनां तत्त्वानां अध्ययनम्।
5. आधुनिकराष्ट्रचिन्तने अस्य नाटकस्य प्रासङ्गिकता।

## 4. शोधविधिः (Research Methodology)

शोधस्य प्रकारद्वयं भवति .1प्रयोगात्मकम्, .2अप्रयोगात्मकञ्चेति। प्रकृतस्य शोधकार्यस्य प्रकृतिः अप्रयोगात्मिका वर्तते । तत्रापि " शोधकार्यमिदं गुणात्मक शोधान्तर्गतं वर्तते। गुणात्मकं शोधकार्य दार्शनिकैतिहासिकविषयवस्तु विश्लेषणादिकं विविधप्रकारकं वर्तते। -स्वीकृतस्य शोधकार्यस्य प्रकृतिः विषयवस्तुविश्लेषणात्मिका वर्तत इत्यतः शोधकार्यमिदं सम्पादयितुं**विषयवस्तुविश्लेषणविधेः** प्रयोगो विधास्यते । अत्र 'एकाग्रभारतम्' नाटकस्य दशसु श्लोकेषु राष्ट्रशब्दप्रयोगस्य प्राथमिकस्रोतत्वेन विश्लेषणं कृतम्। कौटिल्यस्य अर्थशास्त्रं, आधुनिकराजनीतिशास्त्रस्य राष्ट्रस्वरूपसिद्धान्ताः, च द्वितीयस्रोतत्वेन प्रयुक्ताः। व्याख्यानात्मकविश्लेषणम्, ऐतिहासिकतुलनात्मकविधिः, च अवलम्बिता।

## 5. प्रतिपाद्यविषयः (Analysis)

'एकाग्रभारतम्' नाटकं राष्ट्रचिन्तनस्य बहुस्तरीयं दर्शनं प्रस्तौति। अत्रत्याः श्लोकाः राष्ट्रस्य विभिन्नानि मुखानि उन्मीलयन्ति: -

### 1. राष्ट्रस्य समग्रस्वरूपम्

नाटककारः राष्ट्रं केवलं राजकीयसंस्था न मन्यते, अपितु सांस्कृतिक-आध्यात्मिक-सामाजिकसमष्टिरूपेण पश्यति। अत्र राष्ट्रस्य आधारः जनचेतना अस्ति।

क्षेत्रम्, जातिः , भाषा, धर्मः, संस्कृतिः, इतिहासः , सभ्यता, आध्यात्मिकभावनादयः एतेषाम् एकतां राष्ट्रस्य स्वरूपस्य तत्त्वानि भवन्ति । राष्ट्रस्य स्वरूपे भौगोलिकः , राजनीतिकः , सांस्कृतिकश्च इमे सम्मिलिताः भवति । एकाग्रभारतमिति नाटके राष्ट्रशब्दस्य प्रयोगः कुत्र कुत्र वर्तते ।

### 2. राष्ट्रस्य एकाग्रतत्त्वम्

**यत्रैकाग्रतया राष्ट्र क्रियते विश्वतोमुखम्।**

**प्रेक्षन्तां प्रेक्षकाः सर्वे प्रेक्षा लोकोत्तरा गतिः ।।1/5।**[5]

अत्र स्पष्टं यत् एकाग्रता राष्ट्रनिर्माणस्य मूलाधारः। यदि जनाः एकचित्तेन कार्यं कुर्वन्ति, तर्हि राष्ट्रं वैश्विकस्तरे प्रभावशाली भवति। "यत्रैकाग्रतया राष्ट्रं क्रियते विश्वतोमुखम्" राष्ट्रस्य सर्वोच्चं लक्ष्यं विश्वोन्मुखत्वम् अस्ति। एकाग्रतया इति पदं राष्ट्रस्य अन्तःसङ्गठनं, संकल्पशक्तिं, च द्योतयति। विश्वतोमुखम् इत्यनेन राष्ट्रस्य आत्मीयः विस्तारः, परहितभावना, च विश्वबन्धुत्वम् अभिप्रेतम् । इदं भारतीयदृष्टेः 'वसुधैव कुटुम्बकम्'[6] इत्यस्य तात्त्विकी भूमिका अस्ति ।

### 3. राष्ट्ररक्षा एवं राष्ट्रधर्मः

**शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते।**
**शस्त्रसञ्चालने तस्मादेकाग्रीक्रियतां मनः ।।1/8।।**[7]

अस्य श्लोकस्य भावः अस्ति यत् राष्ट्रस्य सुरक्षा एव तस्य धर्मस्य आधारः। सुरक्षाविना राष्ट्रधर्मः, सामाजिकव्यवस्था च दुर्बला भवति। "शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते" राष्ट्रधर्मः, अर्थात् सामाजिक-न्यायः, व्यवस्था, संस्कृतिः, च तदा सम्यक् प्रवर्तते यदा राष्ट्रं सैन्यबलेन सुरक्षितम् अस्ति। शस्त्रसञ्चालने एकाग्रीकरणं आवश्यकम् इति नाटककारः स्मारयति। अयं भावः क्षत्रियधर्मस्य, राज्यस्य अस्तित्वरक्षायाः च मूलं वर्तते।

### 4. राष्ट्रैकता

**एकं राष्ट्रस्य पर्यायो राष्ट्रमेकीकृतं पदम् ।**
**राष्ट्रियं सत्त्वमेकत्वे यथायोगं तदुच्यते ।।1/12।।**[8]

अत्र राष्ट्रस्य वास्तविकस्वरूपं एकत्वे निहितम्। भाषाभेदः, धर्मभेदः, जातिभेदः वा राष्ट्रस्य अखण्डतां न बाधते। अस्मिन् श्लोके राष्ट्रस्य 'अभिन्नत्वं' प्रतिपादितम्। 'राष्ट्रमेकीकृतं पदम्' इति उक्त्या बोध्यते यत् विभिन्नाः प्रदेशाः, भाषाः, सम्प्रदायाः च अपि एकस्मिन् सूत्रे संलग्नाः भवन्ति। अत्र 'एकत्वं' राष्ट्रियसत्त्वस्य मूलं वर्तते। ऋग्वेदस्य 'संगच्छध्वं सं वदध्वं'[9] मन्त्रः अपि राष्ट्रस्य एकीकृतस्वरूपाय बलं ददाति । 'यथायोगम्' इति पदं सूचयति यत् विविधतायां एकता एव राष्ट्रियसत्त्वस्य प्राणः।

"एकं राष्ट्रस्य पर्यायो राष्ट्रमेकीकृतं पदम्" राष्ट्रस्य 'एकीकृत'स्वरूपम् एव तस्य सारः। राष्ट्रियं सत्त्वम्' इति विशेषणं राष्ट्रस्य मनोवैज्ञानिकम्, आध्यात्मिकम्, च सामूहिकचैतन्यम् सूचयति। इदं वैशिष्ट्यं राष्ट्रं केवलं राजनैतिकसंस्थायाः परम् उन्नयति ।

### 5. नेतृत्वं एवं सेवाभावः

**स्वधर्मं लोकधर्मेण सङ्गमय्य यथायथम्।**
**नायकाः सेवकायन्ते सेवका नायकोपमाः ।।1/15।।**[10]

अत्र नेतृत्वस्य सेवाभावः प्रतिपादितः। नायकाः सेवकभावेन कार्यं कुर्वन्ति, तथा च नागरिकाः उत्तरदायित्वपूर्णाः भवन्ति। "स्वधर्मं लोकधर्मेण सङ्गमय्य" राष्ट्रस्य आदर्शः नायकः (स्वामी) सेवकवत्, सेवकः नायकवत् आचरति। स्वधर्मस्य (व्यक्तिगतधर्मस्य) लोकधर्मेण (सामूहिकहितेन) सह सङ्गमनम् एव राष्ट्रसङ्गठनस्य मूलमन्त्रः अस्ति। इदं प्लेटोः 'दार्शनिकराजा' इत्यस्य तथा च कौटिल्यस्य राजर्षिः इत्यस्य च सदृशम् अस्ति ।

### 6. सांस्कृतिक-आध्यात्मिकसमन्वयः

**नारायणश्चेन्नगरे शिवः साक्षाद्वनान्तरे।**
**द्वयोर्योगेन राष्ट्रस्य स्वरूपं विश्वतोमुखम् ।।3/1।।**[11]

अनेन श्लोकेन धार्मिकसहिष्णुता, सांस्कृतिकैक्यं च प्रतिपादितम्। भारतस्य राष्ट्रस्वरूपं आध्यात्मिकसमन्वयेन युक्तम् अस्ति। "नारायणश्चेन्नगरे शिवः साक्षाद्वनान्तरे" राष्ट्रस्य आत्मा तस्य सांस्कृतिकधार्मिकसहिष्णुतायाम् अस्ति। नगरे नारायणः, वने शिवः अनेन सर्वधर्मसहावस्थानं राष्ट्रस्य भूषणम् अस्ति इति द्योत्यते । 'द्वयोर्योगेन राष्ट्रस्य स्वरूपं विश्वतोमुखम्' इत्यनेन वैदिकदार्शनिकयोः समन्वयः राष्ट्रस्वरूपं विशालं करोति इति सूच्यते ।

### 7. राज्यं तथा राष्ट्रं भेदः

**गङ्गाया उत्तरे भागे मम राज्यं भविष्यति।**
**गङ्गाया दक्षिणे भागे द्रुपदस्य महीपतेः ।। 4/11।।**[12]

अत्र राज्यस्य सीमाविभागः दर्शितः, किन्तु राष्ट्रं तु तस्मात् व्यापकतरं भावात्मकैक्यम् अस्ति। "गङ्गाया उत्तरे भागे मम राज्यम्" अत्र राष्ट्रस्य भौगोलिक-परिसीमानम् अस्ति, परन्तु राज्यविभाजनस्य सामयिकत्वम्, युद्धोत्तरपरिस्थितिः, च अपि सूच्यते । अत्र गङ्गानदीं केन्द्रीकृत्य राज्ययोः विभाजनं द्योत्यते। ऐतिहासिकदृष्ट्या गङ्गा भारतस्य सांस्कृतिकप्राणनाडी इति अस्ति। अयं विभागः कदाचित् पाण्डव-द्रुपदयोः सम्बन्धं बोधयति । परन्तु भारतीयज्ञानपम्परायां गङ्गा केवलं भौगोलिकी सीमा न, अपितु 'पुण्यनदी' मता; यस्य तटे राज्यं भवेत् तत् धन्यम् इति मान्यता । श्लोके 'उत्तरे' 'दक्षिणे' इति शब्दौ राजनीतिकमण्डलं दर्शयतः, परन्तु आध्यात्मिकदृष्ट्या गङ्गा तत्रापि अभिन्ना वर्तते।

### 8. विश्वोन्मुखराष्ट्रभावना

**"एकाग्रीकरणं न केवलमिदं स्वार्थोन्मुखं वर्तते**
**राष्ट्रव्यापिपरार्थसंघटनया तद्वस्तु विश्वोन्मुखम्।**
**यत्केचित्क्वचिदर्पयन्ति समुदं सर्वस्वमुद्योगिन-**
**स्तत्पौरस्त्यपदाभिधेयमुदितं वैश्वीकृतं भारतम् ।।5/3।।**[13]

अत्र राष्ट्रस्य परार्थपरता प्रतिपादिता। राष्ट्रं केवलं स्वहिताय न, अपितु विश्वकल्याणाय अस्ति। "राष्ट्रव्यापिपरार्थसंघटनया तद्वस्तु विश्वोन्मुखम्" अत्र 'परार्थः राष्ट्रव्यापी कार्यम् अस्ति । 'वैश्वीकृतं भारतम्' इत्यनेन भारतस्य वैश्विकदायित्वम्, आध्यात्मिकनेतृत्वम्, च अभिव्यक्तम्। इदं चिन्तनम् आधुनिकवैश्वीकरणयुगे अत्यन्तं प्रासंगिकम् अस्ति ।

### 9. राष्ट्रैक्यस्य परमलक्ष्यम्

**राष्ट्रमेकीकृतं भूयादेकाग्रे जित्वरे नरे।**
**तेन सख्येन च हरिर्भुवो भारं हरेदिति।। 5/26।।**[14]

अत्र राष्ट्रनिर्माणस्य अन्तिमलक्ष्यं एकता इति प्रतिपादितम्। एकीकृतराष्ट्रमेव विश्वशान्तेः आधारः भवति। "राष्ट्रमेकीकृतं भूयादेकाग्रे जित्वरे नरे" राष्ट्रस्य एकीकरणेन, जितेन्द्रियनरेभ्यः , भगवान् हरिः (विष्णुः) पृथ्व्याः भारं हरति, अर्थात् विघ्नान् नाशयति। अत्र राष्ट्रैक्यम् आध्यात्मिकसिद्धेः साधनत्वेन प्रतिष्ठितम् अस्ति।

## 6. निष्कर्षः (Conclusion)

"एकाग्रभारतम्" नाटके राष्ट्रस्वरूपस्य अत्यन्तं व्यापकं, गम्भीरं च चित्रणं कृतम् अस्ति। अत्र राष्ट्रं न केवलं भौगोलिकप्रदेशः, अपितु

जनचेतना, सांस्कृतिकैक्यं, आध्यात्मिकभावना, राजनीतिकव्यवस्था च समन्वितरूपेण प्रतिपादितम्। नाटककारः राष्ट्रधर्मं, राष्ट्ररक्षां, राष्ट्रैकतां, लोककल्याणं च मूलतत्त्वत्वेन स्वीकरोति। कौटिलीयसप्ता-ङ्गसिद्धान्तस्य प्रभावः स्पष्टतया दृश्यते। विशेषतः जनपदस्य तथा दण्डतत्त्वस्य महत्त्वं पुनः पुनः प्रतिपादितम् ।

अतः निष्कर्षतः वक्तुं शक्यते यत् "एकाग्रभारतम्" नाटकं भारतीयराष्ट्रचिन्तनस्य आधुनिकसाहित्ये सशक्तं प्रतिबिम्बम् अस्ति, यत् प्राचीनराजनीतिकदर्शनं आधुनिकराष्ट्रीयभावनया सह समन्वय-यति तथा विश्वबन्धुत्वप्रधानं राष्ट्रदर्शनं प्रस्तुतम् ।

**सन्दर्भसूची**


1. आचार्यः .(2005) , सत्यनारायण .डॉ ,संस्कृतशोधप्रविधिः तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्।
2. पाण्डेय , डॉ रामलखन , (वि गानायनी लखनऊ.( 2063 . गोतमीनगर : मंजु प्रकाशन
3. पाण्डेय , डॉ रामलखन , ( .( 2014 गीतिकालहरी लखनऊ गोतमीनगर: हपर्वाप्रकाशन
4. पाण्डेय , डॉ रामलखन , ( .( 0000एकाग्रभारतम्
5. पाण्डेय , डॉ रामलखन , ( .( 0000शब्दार्थप्रकाश
6. पाण्डेय , डॉ रामलखन , ( .( 0000सत्रहवी शताब्दी के संस्कृत महाकाव्य ,लखनऊ गोतमीनगर : नाग पब्लिशर्स
7. **भरतमुनिः** (२०००). **नाट्यशास्त्रम्** (मणिप्रभादीक्षितव्याख्यास हितम्)। दिल्ली: नागप्रकाशनम्।
8. **शुक्लः, रामचन्द्रः** (१९९८). **संस्कृतनाटकस्य इतिहासः**। इलाहाबाद: लोकभारतीप्रकाशनम्।
9. **द्विवेदी, हजारीप्रसादः** (२००२). **संस्कृतसाहित्यस्य इतिहासः**। दिल्ली: राजकमलप्रकाशनम्।
10. **शास्त्री, हरिप्रसादः** (१९९५). **नाट्यकलाकोशः**। वाराणसी: विश्वविद्यालयप्रकाशनम्।
11. शर्मा, आर. एस. *भारतीयराजनीतिकचिन्तनम्*
12. उपाध्याय, बलदेवः *संस्कृतसाहित्ये राष्ट्रचिन्तनम्*
13. मिश्रः, हरिप्रसादः *भारतीयसंस्कृतिः एवं राष्ट्रवादः*
14. संस्कृतग्रन्थरत्नमाला **(डिजिटलपुस्तकालयः)**। https://sanskrit documents.org
15. भारतीयज्ञानपरम्पराप्रोजेक्ट्। https://iks.iitgn.ac.in
16. संस्कृतनाटकसंग्रहः **(डिजिटलसंस्करणम्)**। https://sanskritdr ama.com
17. भारतीयशिक्षामन्त्रालयस्य ज्ञानपरम्पराविभागस्य जालस्थान-म्। https://www.education.gov.in/iks
18. राष्ट्रियसंस्कृतसंस्थानस्य प्रकाशनानि। https://www.sansk-rit.nic.in


**पाद टिप्पणी**

1. एकाग्रभारतम्
2. एकाग्रभारतम् 1/8
3. कौटिल्यस्य अर्थशास्त्रम्
4. कौटिल्यस्य अर्थशास्त्रम्
5. एकाग्रभारतम् 1/5
6. महोपनिषद 4/71
7. एकाग्रभारतम् 1/8
8. एकाग्रभारतम् 1/12
9. ऋग्वेद 10.191.2
10. एकाग्रभारतम् 1/15
11. एकाग्रभारतम् 3/1
12. एकाग्रभारतम् 4/11
13. एकाग्रभारतम् 5/3
14. एकाग्रभारतम् 5 / 26